# Shri Marutistavah or NamaHpanchashika

# શ્રીમારુતિસ્તવઃ અથવા નમઃપઞ્ચાશિકા

## Document Information

Text title : Marutistavah 2

File name : mArutistavaH2.itx

Category : hanumaana, rAmAnanda

Location : doc_hanumaana

Author : rAghavAnandAchArya

Latest update : January 22, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 23, 2024

*sanskritdocuments.org*

# Shri Marutistavah or NamaHpanchashika

# શ્રીમારુતિસ્તવઃ અથવા નમઃપઞ્ચાશિકા

સસીતં રાઘવં નત્ત્વા મારુતિં સ્વગુરું તથા ।
શ્રીમારુતિપ્રસાદાય કુર્વે શ્રીમારુતિસ્તવમ્ ॥ ૧॥

નમસ્તે રામદૂતાય રામભક્તાય તે નમઃ ।
શ્રીહનૂમન્ નમસ્તુભ્યં મારુતે તે નમો નમઃ ॥ ૨॥

નમસ્તે વાયુપુત્રાય અઞ્જનાસૂનવે નમઃ ।
કપીન્દ્રાય નમસ્તુભ્યં મારુતે તે નમો નમઃ ॥ ૩॥

ગદાધારિન્ નમસ્તુભ્યમદ્રિધારક તે નમઃ ।
વિઘ્નહારિન્ નમસ્તેઽસ્તુ મારુતે તે નમો નમઃ ॥ ૪॥

નમઃ સુખપ્રદાત્રે તે દુઃખહારક તે નમઃ ।
નમો રામકૃપાપાત્ર મારુતે તે નમો નમઃ ॥ ૫॥

જ્ઞાનપ્રદ નમસ્તુભ્યં ભક્તિદાયક તે નમઃ ।
ભક્તિપ્રદ નમસ્તુભ્યં મારુતે તે નમો નમઃ ॥ ૬॥

નમો લઙ્ઘિતપાથોધે લઙ્કાદાહક તે નમઃ ।
નમઃ સીતાશુચો હર્ત્રે મારુતે તે નમો નમઃ ॥ ૭॥

નમો રાક્ષસહન્ત્રે ચ ભક્તાનાં રક્ષિણે નમઃ ।
નમસ્તારકદાત્રે ચ મારુતે તે નમો નમઃ ॥ ૮॥

નમો રામરહસ્યજ્ઞ વેદાન્તવેદિને નમઃ ।
નમો દયાનિધાનાય મારુતે તે નમો નમઃ ॥ ૯॥

નમો બલસમુદ્રાય મનોવેગાય તે નમઃ ।
મહાવીર નમસ્તુભ્યં મારુતે તે નમો નમઃ ॥ ૧૦॥

નમસ્તે મૈથિલીશિષ્ય બ્રહ્મણો ગુરુવે નમઃ ।
નમઃ શ્રીરામદાસાય મારુતે તે નમો નમઃ ॥ ૧૧॥

આચાર્યવાસવશ્રીમદ્રાઘવાનન્દનિર્મિતઃ ।
મારુતેર્હિ પ્રસાદાય ભવતાન્મારુતિસ્તવઃ ॥ ૧૨॥

ઇતિ દુર્વાદધ્વાન્તમાર્ત્તણ્ડ જગદ્ગુરુ શ્રીરાઘવાનન્દાચાર્ય
સિદ્ધસંરાટ્પ્રણીતા શ્રીમારુતિસ્તવઃ (નમઃપઞ્ચાશિકા) સમ્પૂર્ણઃ ।

Proofread by Mrityunjay Pandey

*Shri Marutistavah or NamaHpanchashika*
pdf was typeset on January 23, 2024

Please send corrections to *sanskrit@cheerful.com*